नं० ४८९५

नाम – आसुरी कल्पः

कर्त्ता – x

पत्र संख्या १० पत्राणि सं० x

विषयः – तन्त्रम्

कस्तुरीकल्पः

४८९५

4895

F. 10

आसुरिकल्प श्लो०
१६२

आ०
॥२॥

ॐस्वस्तिश्रीगणेशांबिकेशिवायगुरवेनमः अथ आसुरीकल्पंव्याख्यास्यामः कार्तिकेउवा
च कैलासासिखरासीनंदेवदेवंसदाशिवं स्कंदःपृच्छतितत्वमेरहस्यंवेदसंमितं १ वस्या
कर्षणविद्वेषोच्चाटनंस्तंभमारणं त्रैलोक्यांतर्गतंनाथ्यानिग्रहायसुरेवन च २ ब्राह्मणाःक्ष
त्रियोवैश्यशूद्रश्चांतरजातयः साधयस्वात्सुतद्ब्रूहिद्रूपयापरयाविभो ३ शिवउवाच
शृणुवत्समहामंत्रमासुरीविधिपूर्वकं देहन्यासकरंन्यास अंगन्याससमन्वितं ४ एवं
ध्यात्वाजपेद्यस्तुतस्यासविरनेकधा सर्वेचासिद्धिमायांतिदेवगंधर्वयक्षगाः ५ कार्ति
केयउवाच विधिंकथयमेतात आसुरीकल्पसंभवः कोरितुतिथिनक्षत्रंकोमासः
कोपिवासरः ६ किंवर्षं किंचवेलायांकिंस्थानेचास्याकारयेत् ईश्वरउवाच नतिथिर्न

चनक्षत्रंनमासोनचवासरः ७ नचनियमोनचक्रतुर्नवेलाविधिरेवच नारिवाच
रात्रिर्वीनोपक्षीनैवपक्षकः ८ हंतुकामस्यशत्रूणांक्रोधरावाप्यकारणं अथशत्रु
वश्य आसुरीसर्षपचैर्मैर्णाप्रतिमांकारयेज्जनैः ९ रविकाष्ठेनप्रज्वाल्यतद्दाग्नौकर्मे
माचरेत् हस्तिराणवाहमारभ्यशस्त्रराशोऽर्ध्येत्वनः १० अष्टोत्तरशतंसंख्या प्रतात्क्तांजुहु
याद्दिह सप्तशतंतथासंख्यापश्चजाप्यंतुकारयेत् ११ सर्वेहोमेजपन्मेचकारयेत्सप्त
वासरे एकभक्तंतथाकुर्यात्सुधीर्भूत्वासमाहितः १२ सप्तहादृश्यमायांतिरायेभाराव
लाजनाः आसुरीप्रतिमांकृत्वातनुन्याससमाचरेत् १३ पादौतलेनमरिमभि प्रति
मामेककारयेत् मस्तकेहृदयेगुह्येललाटेपाणिपादयोः १४ एषुस्थानेतेशस्त्रेह
त्वासर्पिसमन्विते सप्तहाद्दादशमायांतिसजनोराजपूजकः १५ सर्वकावसमायांति

आ०
२

वश्यतां राजयोषितां आसुरीं प्रतिमां कृत्वा आक्रम्य वाम पाद्दयोः १६ पूर्वोक्तेन विधा
नेन जुहुयात् घृतसंयुतां आः शोत्तरशतसंख्यां जपं तु कारयेत् १७ मासमेकं दिनं प्रच
च वशमायान्ति कामिनी अथ ब्राह्मनवश्यं पूर्ववत् प्रतिमां कृत्वा विधानं सर्वमाचरेत्
१८ पालाशकाष्ठैर्वह्नौ चगौघृतैर्होममाचरेत् ब्रह्मवृक्षसमिद्भिस्तु जुहियात् घृ
तसंयुतं १९ पूर्वोक्तेन विधानेन जपं होमं तु कारयेत् पालाशपुष्पहोमेन आसुरैः पा
यसैः सह २० सप्ताहाद्वशमायान्ति ब्राह्मणो वरपारगाः अथ क्षत्रियवश्यं विधिना
पूर्ववद्धोममष्टोत्तरशतं तथा २१ आसुरी गुडसंमिश्रा जुहियात् सुरभी घृतैः अश्वत्थ
काष्ठसमिद्धेर्मूलमन्त्रेण कारयेत् २२ द्वादशावासरमध्ये तु क्षत्रियवशमाजपेत् अ
थ वैश्यवश्यं शिवत्रयं कृत्तेजा यां शान्तसप्तकमग्रवे २३ कृष्णपक्षे चतुर्दश्यां मध्या

ह्नेचपराह्णके एवंदिनत्रयेंकृत्वाघृताक्तामासुरीञ्जुहेत् २४ अष्टोत्तरशतंसंख्यात्रिका
लंजपमाचरेत् दिनत्रयेकृतेहुत्वाजपपसद्येकृते २५ सप्तमेदिवसेप्राप्तेवैश्योव
श्यमवाप्नुयात् अथशत्रुघाते निंबकाष्ठाग्निप्रज्वाल्यनिंबसमिद्भिःप्रयत्नमेः २६
आसुरीकटुतैलेनहुत्वाएवंविधानतः शतंमष्टोत्तरंसंख्यानित्यंजाप्यंतुकारयेत्
२७ सप्ताहात्तद्रिपोस्तस्यनिधनंभवतिध्रुवं द्वितीयप्रयोगः रविवह्निंतुप्रज्वा
ल्यपामहूस्ताष्टमीदिने २८ आसुरीमर्केदुग्धेनार्कसमिद्भिःसुहोमयेत् एवंवि
धिकृतेसर्वंजपंहोमादिनाष्टकं २९ तद्रिपुःक्षययातिसपीडीवायथाक्षये अ
थस्फोटने रविकाष्ठैःकृतेहोमे आसुरीमर्कपायसैः ३० अष्टोत्तरशतंसंख्या
वरीनेत्रविनाशनं अथशांतिकरणं गोदुग्धेनासुरींहुत्वाशोभनेचहुतासने

आ० ३१ समाहात्स्वस्थमायातिनेध्रंचनिर्भयंव्रजेत् अथापस्मारोसाहने अश्वगंधभीरो
२ मोरिाश्वानरोमान्वितानिच ३२ एकचक्रतांत्रितयेत्नामोच्चाररोहुतेत् मंत्रपाठंस
प्रहिनेहोमंकृत्वाहिनाष्टक ३३ अपस्मारोभवेत्तस्यचज्वराद्याविविधास्तथा या
रम्सल्चाविवमममनेकोगसमुद्भवं ३४ अथशांतिः आसुरीविधिवत्पिष्टंकपि
लापायसेनच होमंकुर्यात्सवाचैवसर्वशांतिप्रदंबुधः ३५ अथसद्याज्वराग
3 मे आसुरींलवरौमिश्रंहुत्वासप्ताहिनानिच पूर्वोक्तेनविधानेनसद्योऽज्वरप्रपीड
येत् ३६ आसुरीचगोदुग्धेनहुत्वाशांतिर्भवेत्ततः अथोन्मत्तकरणं आसुरी
चचितामस्मजनमंससमन्वितं ३७ मत्तनिमील्यसंयुक्तंचूर्णमेकंचकारयेत्
अष्टोत्तरशतसंख्यानचूर्णमभिमंत्रयेत् ३८ प्रक्षिपेत्ताइयोमर्द्धिविकलोभव

त्रिधुवं आसुरीं। निंवपत्रैस्तकटुतैलेन होमयेत् ३९ यन्नामोच्चारयेन्मंत्री विस्फोट
कस्तपरुंइति पूर्वोक्तेनविधानेनआसुरीसहयायसैः ४० विधाना कारये द्धोमस्त
स्योभवतिनान्यथा नगरकुष्ठकहोमंआसुरीपुष्पमेवच ४१ तत्समासुरमासीन्य
सूक्ष्मचूर्णंतुकारयेत् अष्टोत्तरशतंसंख्यातचूर्णमभिमंत्रयेत् ४२ शंतिय
स्य ग्रावाशुसर्वअनुचरोभवेत् उशिरतगरंकुष्ठमुस्तंचत्वहसर्षपा ४३ आसु
रीपत्रसंयुक्तंतच्चूर्णमभिमंत्रयेत् अष्टाविंविंशतिसंख्याकंजप्त्वावस्त्रसमाच
रेत् ४४ पुरुषोवाथवानारीस्पृष्ट्वातांवशमानयेत् आसुरीमूलपत्राणिपुष्पा
णिचफलानिच ४५ नागेंद्रमदरसंयुक्तंसूक्ष्मचूर्णंतुकारयेत् अष्टोत्तरशता
वृत्त्यामूलमंत्रेणमंत्रवित् ४६ एवंविदि धिना कुर्यीयस्यतच्चूर्णंसवशी

आ० ४
5

भवेत् शास्त्राग्नि यं गुग्गुलतगरं तच्चूर्णं नागकेसरं ४७ पंचाङ्गमासुरीचूर्णं अष्टोत्तरमभिमं
त्रिते यन्नामोच्चारणस्पृष्टास्तया तिवशमानय ४८ आसुरीपुष्पचूर्णानि सौवीरं नागके
सरं सौवीरो जनसंयुक्तं सर्वमेकत्र कारयेत् ४९ स्वम्भपुष्पमूलं मे चैतानष्टोत्तरशतेन च
तच्चूर्णं नाञ्जनं कृत्वा आत्मनेत्रे विधियते ५० यान् यान् पश्यति चेच्छस्ते सोयं भवति वश्य
ग पञ्चाङ्गमासुरा ध्वमात्मानं धूपयेद्बुधः ५१ कृत्वा तद्धूममात्रेण सर्वे वशानवश्यगाः
अष्टोत्तरशतं रव्याद्रिकालं साधको जपन् ५२ विधिना हृदि होमेन हृष्मि धि गस
स्थमासुरा करीमासे संयुक्तां होमं कुर्याद्दिनत्रये ५३ सर्वे ते वशमायान्ति राजा
नस्थ ससेवकाः आसुरीकाष्ठसमिद्भिः रष्टोत्तरशतं बुधः ५४ सार्पयुक्तं च तत् सर्वम
लमन्त्रेण होमयेत् सप्ताहं कारयेद्धोमं लभते सुमहाहृधिः ५५ आसुरीसर्पिषायुक्तं

मधुदधिसमन्वितं हुत्वा च विधिनोक्तेन पुनर्जीर्य्यं तत्कारयेत् ५६ जपेत्तद्देवसाह
स्रं दशांशात्परं हुतं शतायुर्वै भवेत्सोपि आसुर्याः सुप्रसादने ५७ दशलक्षं जपेत्कु
र्याद्दशांशात्परं हुतं विधिना आसुरीं ध्यात्वा राज्यार्थी राज्यमाप्नुयात् ५८ पंचल
क्षं जपेन्मंत्रं दशांसे हवने कृते आहुतिर्दशसाहस्रं जुहियाद्दासुरीसमः ५९ आसुरी
मधुसंयुक्ता दधिसर्पिः सशर्करा लक्षायाहुतिर्वहोमेन नगरं राज्यदायते ६० नगरेल
क्षमाहुत्या दुग्धखंडसमन्वितं । लहिरण्यजजवापीडागतेराज्यहिलभ्यते ६१ गृहीत्वा
चासुरीपुष्पं तोयमध्ये प्रवेशयेत् स्पर्शस्याभिमुखेवा भूत्वा अर्चेद्द्यात्सहस्रके ६२ विधि
नाम्रलक्षमंत्रेण अभक्ता पुष्पसंभवैः पद्मैर्वेराभिमंत्रस्य पद्मवाद्याभिमंत्रयेत् ६३ तच्चू
र्णेकरुशेहत्वा आत्मानं तारयेत्सुधीः तत्कुंभं विधिना प्रज्येद्दारिद्र्यं नाशयेद्ध्रुवं ६४ आर

आ० ५

त्याभिमुखोभूत्वाजपेश्च ज्वरनाशने सहस्राहुतितोजाप्यंहितार्थेचविधानवित् ६५
आसुरीपत्रपुष्पाणिमधुसर्पियुतानिच जपहोमेहुतेदेवीदुष्टग्रहविमोचने ६६ अथ
आसुरीमंत्रः ॐ ह्रींकटुकेकटुकपत्रेसुभगेआसुरीरक्तेरक्तवाससेअथर्वणस्यदुहिते
अघोरेअघोरकर्मकारिकेअमुकस्यगतिंदह २ उपविष्टस्यगुदंदह २ सुप्तस्यमनोदह २
प्रबुद्धस्यहृदयंदह २ हन २ मथ २ पच २ अयतावद्दहतावत्यचयावन्मेवशमानयातिंफट्
स्वाहा अथषडंगन्यासः ॐ ह्रींकटुकेकटुकपत्रेहुंफट्स्वाहाहृदयायनमः सुभगेहुंफट्
स्वाहा शिरसेस्वाहा ॐ आसुरीरक्तेरक्तवाससेहुंफट्स्वाहाशिखायैवौषट् ॐ अथर्वण
स्यदुहितेहुंफट्स्वाहाकवचायहुं ॐ अघोरेअघोरकर्मकारिकेहुंफट्स्वाहा नेत्रत्र
यायवौषट् हुंफट्स्वाहाअस्त्रायफट् एवंशमरेवमंत्रे करैन्यासः पुत्रार्थेधनार्थेदारा

र्थीच्छियमिच्छता चकुंडं प्रकर्त्तव्यं चतुःकोणं समाचरेत् स्थंडले हवनं कुर्यात् वीराः सुर्याः पायसेन
च शर्करामुद्रया याः वश्यार्थं वर्त्तुलं कुंडं कृत्वा चमर गमुद्र या हवनं कुर्यात् पूर्वोक्तेन विधा
नेन होमं कुर्यात् दृशीकृतौ चतुरस्रं भवेत्कुंडं त्रिकोणं परराज हंसमुद्रया हंसमाचरेत् रिपुमा
रणाहितवे रात्तौ त्रिविधं कुंडं मुद्रा विधि समन्वितं विकर्मा रव्येतु शिरव्यां तु वध्यां गणयि समा
न्वितं रविपत्रोपरिस्थाप्य महामाया तथासुरी अंगुष्ठं पंचमात्रेणाम् मं त्रे प्रतिष्ठितं म
न्त्रमंत्रेण आसुरी मागच्छ प्रतिष्ठिता भव अथाध्याने रक्तवस्त्र परिधाने रक्तालंकार भूषितां
ततः पश्चाद् दिव्याग्नेयांतरे अर्थार्कपुत्रिका आसुरी गायत्री विद्या ॐ क इकेक इकयत्रे आ
सुरी रक्तवाससे अथर्वणस्य दुहित्रे अघोरे अघोर कर्मकारिके अमुकं हन २ पच २ तावद् हर
तावत् पच २ यावन्मे वशमानय स्वाहा शय्यास्थिता यास्त्वा वद् हे यावत्स पिति प्रति नायाग

आ० ६

त्तिहहस्वाहा ॐउपरिष्ठायायागतिंह हस्वाहा ॐसुमायायागतिहह २ यहहस्वाहा ॐप्रक्षुधा
यातेह २ यंहह हस्वाहा वरुणऋषिः विराट्छंदः आसुरी देवता मुखसिद्ध्यर्थे जपेविनियो
गः ॐह्रींकटुकेकटुकपत्रेहतसुभगेशिरः आसुरीरक्ताबासमसेशिखा आथर्वणस्यदु
हितेकवचाः अघोरे अघोरकर्मकारिकेनेत्रत्रया अमुकंहन २ अस्त्रा कुमारीध्येय
अयुतंजपः दत्तांशराजिकयासहस्रहोमः इतिपुरश्चर्या अथप्रयोगाः अष्टोत्तरा
त्तिमंत्रिता आसुरीपंचांगेनस्वशरीरेमधूपयेत् योसि धूपितं तं वशयति आसुरीपु
ष्पकृतेसहस्रहोमस्त्रवंणीनिरुध्यते त्रिमध्वक्तस्यलहोमात् सर्वंवशयति एतेस्तुरा
जिकाप्रतिमांइत्सिरातोमस्तकांतापत्स्यावामांघ्रामारयखड्गेनछित्वा अष्टोत्तरश
तंहोमः एवंसप्ताहादशयति कटुतैलोत्तनिवपत्रराजिकाअष्टोत्तरशतंहोमोररिः

सद्योज्वरे रागग्रस्ते अर्कदुग्धाक्ता आसुरी फलाष्टोत्तरं शत होमाद्दरिनेत्रनाशः कटुतैला
क्ता निंबपत्रलवणहोमाद्दिहेहस्फोटकोत्पत्तिः अथमहाप्रयोगः स्मसानभस्मचतुःपल
प्रस्थत्रयंलवणंएतत्समाराजकाः कटुतैलाक्ताष्टस्थानेनशत्रुप्रतिमांपत्रोपरिनिधा
यघाराणात्पूतिसाप्यतन्मृतः शस्त्रपातयंतेत्स्ययत्वाविभीतकसमिद्भिः सतैलकटु
तैलाक्तनिंबंधनाग्नौ आष्टोत्तरशताहुतीर्हुत्वा चिरेष्यमारयेत् मरकमीरिणानिंबंधनं
सर्वेच शतमिष्यते अनुग्रहस्थेत्कपिलादुग्धयाचितराजिकाहोमेनशांतिः अस्यश्री
आसुरीमंत्रस्यमलादेवऋषिः आद्या आसुरीशक्तिः ॐह्रीं आसुरी देव्यौविद्महे ऐं अ
स्त्रैवेराणवेश्मायधीमही हौंहुंफट्टप्रचोदयात् अस्यश्री आसुरीमंत्रस्यमलादेवऋषिः आ
द्या आसुरीशक्तिः ब्रह्मादेवतागायत्रीत्रिष्टुप्जगती अनुष्टुप्छंदांसि ह्रींबीजं हौंशक्ति

आ० ७

क्लींकीलकं जपे विनियोगः ॐ ह्रीं कड्ड्के अमुकस्य गतिं हर हर स्वप्नविद्यायां भगे २ हर २ सुप्ता
यामानो हर २ प्रबुद्धायां हर २ यं हर २ पच २ मथ २ हन २ मथ तावत्पच तावदिह यावन्मे॥ अ
मुकमेव समानय २ हुं फट् स्वाहा ॐ क्लुं क्ले अमुकस्य सुगतिं कुरु २ स्वप्नविद्यायां भगे रक्ष २
सुप्तायां सुमनसं कुरु २ प्रबुद्धायां तं यं रक्ष २ अमुकस्य स्वस्थं कुरु २ हुं फट् स्वाहा आस्य आ
सुरीविधिः आचमनं प्राणायामं कृत्वा स्नानं स्मृत्वा आसुरीमंत्रजपमहं करिष्ये अप
वित्रः पवित्रोन रुथ्यावित्वा याध्ट तास्तोको करध्याह्निकं अथ भूतशुद्धिं करालवदनं
पिंगाक्षं रक्तकेशं प्रतिभाषणारक्तवर्णं निधाय षट्कोणं षड्विंदुरेखाछितं तेयन्नाभौ
त्रिकोणं स्वस्तिकरेखास्थितं वह्निमंडलं रक्तवर्णं मध्ये चेदं मंडलं वायुमंडलं लंबस
रं इंस मध्ये वरुणमंडलं अर्धचंद्राकारं स्वशरीरं तेजोमयपिंडीभूतं प्राणप्रतिष्ठामंत्रस्य

ब्रह्माविष्णुरुद्र ऋग्वेद ऋग्यजुसामाथर्ववेदाछंदांसि प्राणशक्तिर्देवता आंबीजं ह्रींबीजं क्रों
शक्तिः प्राणप्रतिष्ठापेविनियोगः ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों हं सः सोहं अमुकदेवता
प्राणा इह प्राणा अमुकदेवता इह स्थितः अमुकदेवतास्य वाङ्मनचक्षुश्रोत्रघ्राणप्राणा
जिह्वा इहागत्यसुखं चिरंतिष्ठंतुस्वाहा ॐ ह्रीं आसुरीदेव्यै विद्महे अथर्ववेदाय धीम
हिह्रौंहुंफट् प्रचोदयात् अस्यश्री आसुरीमंत्रस्य महादेवऋषि आद्या आसुराशक्तिः दे
व्या देवतागायत्रीत्रिष्टुप् जगती अनुष्टुप्छंदांसि ह्रींबीजं ह्रौंशक्तिः क्लींकीलकं जपेवि
नियोगः षडंगन्यासः ॐ ह्रीं कटुके कटुकपत्रे हुंफट् स्वाहा हृदयायनमः सुभगे हुंफ
ट् शिरसेस्वाहा आसुरारक्तवाससे हुंफट् स्वाहा शिखायैवौषट् अथर्वणस्य दुहिते
हुंफट् स्वाहा कवचायहुं अघोरे अघोरकर्मकारि हुंफट् स्वाहा नेत्रत्रयायवौषट् ॐ

आ० ह्रां ह्रीं फट् स्वाहा अस्त्राय फट् एवमेव करन्यासः सर्वांगमातृकान्यासः अस्य मातृकामन्त्रस्य
ब्रह्मा ऋषिः परब्रह्म देवता गायत्री छन्दः ह्रीं बीजं श्रीं शक्तिः क्लीं कीलकं मातृकाप्रीत्यर्थे ज
पे विनियोगः षोडशस्वरमातृकान्यासः ॐ ह्रीं अं पादांगुष्ठाभ्यां नमः आं पादतर्जनी
भ्यां नमः इं पादमध्यमाभ्यां नमः ईं पादानामिकाभ्यां नमः उं पादकनिष्ठिकाभ्यां नमः
ऊं पादतलपृष्ठाभ्यां नमः ऋं पादपिण्डिकाभ्यां नमः ॠं जंघयोः ऌं कटि हृदये ॡं नाभौ एं लिंगे
ऐं गुह्ये ओं पादाभ्यां नमः औं स्तनौ अं कण्ठे अः करे अः रन्ध्रे नमः ॐ अस्य श्रीपंचाशद्वर्ण
मातृकामन्त्रस्य परब्रह्म ऋषिः परमात्मा देवता प्रकृतिश्छन्दः मातृकाप्रीत्यर्थे जपे वि
नियोगः ॐ ह्रीं अं नमः शिरसि आं नमः मुखमण्डले इं दक्षनेत्रे ईं वामनेत्रे उं दक्षिणक
र्णे ऊं वामकर्णे ऋं दक्षिणनासापुटे ॠं वामनासापुटे ऌं नमः दक्षिणकपोले ॡं नमः वाम

कपोले रं उत्तरोष्ठे रैं अधरोष्ठे ऊँ नमः ऊर्ध्वदंतपंक्तौ औं नमः अधोदंतपंक्तौ अं नमः ललाट
अः ब्रह्मरंध्रे वा मुखमध्ये कं नमः दक्षभुजमूले खं वामभुजमूले गं मणिबंधे घं तदंगु
लिमूले ङं अंगुल्यग्रे चं भुजद्वयोः छं कूर्परयोः जं तन्मणिबंधे ञं तदंगुलिसंधौ
अं तदंगुल्यग्रे टं दक्षिणोरुमध्ये ठं जानुनि डं जंघायां ढं पादांगुलिसंधौ णं पादाग्रे
गुल्फाग्रे तं वामोरुसंधौ थं जानुनि दं जंघामध्ये धं तदंगुलिसंधौ नं तदंगुल्यग्रे पं दक्षि
पार्श्वे फं वामपार्श्वे बं पृष्ठे भं नाभौ मं गुह्ये यं हृदये रं भुजद्वयमूले लं केवलपृष्ठे षं कुक्षि
दयमूले शं हृदयाद्दारभ्य दक्षिणहस्ते षं हृदयादारभ्य वामहस्ते सं हृदयादारभ्य दक्ष
पादे हं हृदयादारभ्य वामपादे लं हृदयादारभ्य उदरे क्षं हृदयादारभ्य मुखे अस्य
श्रीमातृकान्यासेशरीरस्थानेषु शरीरे पूजयामि अस्य श्रीवर्णमातृकामंत्रस्य चतुर्वेदे

आ०
६

प्रजापतिऋषि आसुरीदेवता अथर्वणाछंदः ह्रींबीजं क्लींकीलकं ह्रौंशक्तिः मातृकासि
द्ध्यर्थेजपेविनियोगः उक्तन्यासः ॐह्रीं एवंसर्वत्रकंनमः ब्रह्मरंध्रे खंशिखायां गंलला
टे घंकपोले ङंनेत्रे चंश्रोत्रे छंचिबुके जंनासिके झंपृष्ठे ञंओष्ठे टंकरे ठंस्कंधयो
र्डंबाहुद्वयोः ढंबाहुमूले णंस्तनयोः तंहृदये थंनाभौ दंकट्यां धंकुक्षौ नंपृष्ठवंशा
योः पंलिंगे फंगुह्ये बंशिग्ध्वयोः भंजंघे मंसर्वसंधिषु यंपिंडिकयोः रंपादे लंपा
दपुटिक्षयो वंसर्वांगशोणिते शंरोमकूपे षंगुह्ये सं वसायां हंषट्चक्रे लंषोडशारे
क्षंसर्वांगेषुन्यसेत् इतिसर्वांगन्यासः अथमंत्रन्यासः ॐह्रांह्रींब्रह्मरंध्रे ॐह्रींलला
टे ॐह्रींॐह्रींकटुके० सुभगे कंठे ॐह्रींकटुकेकटुकपत्रे आसुरीस्कंधयोः ॐह्रींक
टुकेकटुकपत्रे सुभगे रक्तवाससे हृदये ॐह्रींकटुकेकटुकपत्रे सुभगे आसुरि रक्तवा

आ०
११

ससे अथर्वशास्य दुहिते नाभिमडुल्ले ॐ ह्रीं कटुक अघोरे कट्यां. ॐ ह्रीं कटुके अघोरे
अघोरकर्मकारके गुह्यमेढ्रे ॐ ह्रीं कटुके० वशमानय हुं फट् पादयो ॐ ह्रीं क० वशमान
य हुं फट् स्वाहा इति मंत्रन्यासः यंदेवी ह्रीं श्वेते अथ ध्यानं रक्तवस्त्रपरीधानां रत्नालं
कारभूषितां मारक्तकुसुमैः पूज्यां रक्तचंदनचर्चितां दाडिमीबीजमाभासां रोचनस्य
विराजितां सिंदूरारुणावर्णाभां तांबूलैः पूरिताननां महाबलमदोन्मत्तां सिंहमारूढ
संस्थितां मणिरत्नमहाज्योतीरत्नद्रिमुकुटमंडितां मूर्तिध्यानमिदं प्रोक्तं सर्वत्रैव्यसा
धकोत्तमैः ॐ ह्रीं कटुके कटु कपत्रे सुभगे आसुरि रक्तवाससे अथर्वशास्य दुहिते अघो
रे अघोरकर्मकारिके अमुकस्य गतिं दह २ उपविष्टाया भगं दह २ सुप्ताया मनो दह २ प्रबु
द्धाया हृदयं पच २ मथ २ हन २ मथ तावत्पच तावत् दह २ यावन्मे अमुकं वशमानय २ हुं फट् स्वाहा

इति आसुरी कल्पसमाप्तं

सं० ४८९५

तंत्र

पत्रा १०